अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।

दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १६.१ ॥

abhayaṁ sattvasaṁśuddhirjñānayogavyavasthitiḥ |
dānaṁ damaśca yajñaśca svādhyāyastapa ārjavam || 16.1||

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।

दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ १६.२ ॥

ahiṁsā satyamakrodhastyāgaḥ śāntirapaiśunam |
dayā bhūteṣvaloluptvaṁ mārdavaṁ hrīracāpalam || 16.2||

तेजः क्शमा धृतिः शौचमद्रोहो नातिमानिता ।

भवन्ति संपदं दैवीमभिजातस्य भारत ॥ १६.३ ॥

tejaḥ kśamā dhṛtiḥ śaucamadroho nātimānitā |
bhavanti sampadaṁ daivīmabhijātasya bhārata || 16.3||

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।

अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ १६.४ ॥

dambho darpo'bhimānaśca krodhaḥ pāruṣyameva ca |
ajñānaṁ cābhijātasya pārtha sampadamāsurīm || 16.4||